थिंसम्यक्दैवज्ञैःसमुदीरितां ॥ कर्तव्यउपवासस्तुअन्यथानरकंव्रजेत् ॥१२५॥ क्षयेवाप्यथवावृद्धौसंप्राप्तेवादि
नक्षये ॥ उपोष्याद्वादशीपुण्यापूर्वविद्धांपरित्यजेत् ॥१२६॥ पूर्वविद्धांप्रकुर्वाणोनरोधर्मान्निकृंतति ॥ संतते
स्तुविनाशायसंपदोहरणायच ॥१२७॥ कलावेधेतुविप्रेंद्रदशम्यैकादशींत्यजेत् ॥ सुरायाबिंदुनास्पृष्टंगंगां
भइवसंत्यजेत् ॥१२८॥ श्वदृतौपंचगव्यंचदशम्यादूषितांत्यजेत् ॥ एकादशींद्विजश्रेष्ठपक्षयोरुभयोरपि
॥१२९॥ तस्माद्विप्रनविद्धाहिकर्तव्यैकादशीक्वचित् ॥ विद्धाहंतिपुरापुण्यंश्राद्धंचवृषलीपतिः ॥१३०॥
जप्तंदत्तंहुतंस्नातंतथापूजाकृताहरेः ॥ तत्सर्वंविलयंयातितमःसूर्योदयेयथा ॥१३१॥ एकादश्यांयदाब्रह्मन्
दिनक्षयतिथिर्भवेत् ॥ उपोष्याद्वादशीतत्रत्रयोदश्यांतुपारणं ॥१३२॥ प्रतिपत्प्रभृतयःसर्वाउदयादुदयाद्र
वेः ॥ संपूर्णाइतिविज्ञेयाहरिवासरवर्जिताः ॥१३३॥ अरुणोदयकालेतुदशमीयदिदृश्यते ॥ पापमूलंतदा
ज्ञेयमेकादश्युपवासनं ॥१३४॥ अरुणोदयवेलायांदशमीयदिदृश्यते ॥ नतत्रैकादशीकार्याधर्मकामार्थना
शिनी॥१३५॥चतस्रोघटिकाःप्रातररुणोदयउच्यते ॥ यतीनांस्नानकालोयंगंगांभःसदृशःस्मृतः॥१३६॥उद
यात्प्राग्यदाविप्रामुहूर्तद्वयसंयुता ॥ संपूर्णैकादशीनामतत्रैवोपवसेद्गृही ॥१३७॥ उदयात्प्राक्त्रिघटिका

कृष्णा०
॥ ६ ॥

व्यापिन्येकादशीयदा ॥ संदिग्धैकादशीनामवर्ज्याधर्मार्थनाशनी ॥१३८॥ पुत्रपौत्रप्रवृद्ध्यर्थंद्वादश्यामुप
वासयेत् ॥ तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं ॥१३९॥ उदयात्प्राक्द्विघटिकाव्यापिन्येकादशीयदा ॥
संकीर्णैकादशीनामवर्ज्याधर्मार्थकांक्षिभिः ॥१४०॥ पुत्रराज्यप्रवृद्ध्यर्थंद्वादश्यामुपवासनं ॥ तत्रक्रतुशतं
पुण्यंत्रयोदश्यांतुपारणं ॥१४१॥ दशमीशेषसंयुक्तागांधार्यासमुपोषिता ॥ तस्याःपुत्रशतंनष्टंतस्मात्तांपरि
वर्जयेत् ॥१४२॥ अपीषद्दशमीविद्धासदातांपरिवर्जयेत् ॥ सुराबिंदुसमायुक्तांप्रवदंतिमनीषिणः ॥१४३॥
बह्वागमविरोधेषुब्राह्मणेषुविवादिषु ॥ उपोष्याद्वादशीतत्रत्रयोदश्यांतुपारणं ॥१४४॥ एकादश्यांतुविद्धा
यांसंप्राप्तेश्रवणेतथा ॥ उपोष्याद्वादशीपुण्यापक्षयोरुभयोरपि ॥१४५॥ उपरागसहस्राणिव्यतीपातायुता
निच ॥ अमालक्षंतुद्वादश्याःकलांनार्हंतिषोडशीं ॥१४६॥ शुद्धापिद्वादशीग्राह्यापरतोद्वादशीयदि ॥
विषंतुदशमीज्ञेयामृतंचैकादशीतिथिः ॥१४७॥ विषप्रधानावर्ज्यासामृताग्राह्याप्रयत्नतः ॥ द्वादश्यांभोज
नंचैवविद्धायांहर्युपोषणं ॥१४८॥ यःकुर्यान्मंदबुद्धित्वान्निरयंसोधिगच्छति ॥ यानिकानिचवाक्यानिवि
द्धोपोषपराणिच ॥१४९॥ धनदार्चापराणिस्युर्वैष्णवीनदशायुता ॥ अथवामोहनार्थायमोहिन्याभगवा

महा०
॥७६३॥

न्हरिः ॥१५०॥ अर्थितःकारयामासव्यासरूपीजनार्दनः ॥ धनदार्चाविवृद्ध्यर्थंमहावित्तलयस्यच ॥ असु
राणांमोहनार्थंपाषंडानांविवृद्धये ॥१५१॥ आत्मस्वरूपाविज्ञस्यैस्वलोकाप्राप्तयेतथा ॥ एवंविद्धांपरित्यज्य
द्धादश्यामुपवासयेत् ॥१५२॥ कोटिजन्मार्जितंपापमेकयैवविनश्यति ॥ ततःकोटिगुणंचापिनिषिद्धस्येत
रैर्जनैः ॥१५३॥ यदनादिकृतंपापंयदूर्ध्वंयत्करिष्यति ॥ तत्सर्वंविलयंयातिपरेषामुपवासनात् ॥ १५४ ॥
नचतस्मात्प्रियतमःकेशवस्यममापिच ॥ एकादश्यांह्यवेधेतुद्धादशींनपरित्यजेत् ॥१५५॥ पारणेमरणेचैव
तिथिस्तात्कालिकीस्मृता ॥ ब्रह्मचारीगृहस्थोवावानप्रस्थोयतिस्तथा ॥१५६॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रो
भर्तृमतीतथा ॥ अभर्तृकातथान्येचसूतवैदेहिकादयः ॥ १५७ ॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपि ॥
एकादश्यांतुयोभुंक्तेमोहेनावृतचेतसा ॥१५८॥ शुक्लायामथकृष्णायांनिरयंयातिसध्रुवं ॥ विवेचयतियोमो
हाच्छुक्लाकृष्णेतिपापकृत् ॥१५९॥ एकादशींसवैयातिनिरयंनात्रसंशयः ॥ यथागौर्नैवहंतव्याशुक्लाकृष्णे
तिभामिनि ॥१६०॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपि ॥ यानिकानिचवाक्यानिकृष्णैकादशिवर्जने
॥१६१॥ भरण्यादिनिषेधेचतानिकाम्यफलार्थिनां ॥ कामिनोपिहिसिद्ध्यर्थंकुर्युरेवोपवासनं ॥१६२॥ प्रीण

कृष्णा० नार्थंहरेर्नित्यंनतुकाम्यव्यपेक्षया ॥ तस्माच्छुक्लामथोकृष्णांभरण्यादियुतामपि ॥१६३॥ प्रत्यवायनिषेधा महा०
॥ ७ ॥ र्थमुपवासीतनित्यशः ॥ प्रीणनार्थंहरेश्चापिविष्णुलोकस्यचाप्तये ॥१६४॥ कलावार्धकलावापिपरतोद्धाद
शीयदि ॥ द्धादशद्धादशीर्हंतिपूर्वेद्युःपारणेकृते ॥१६५॥ अतिरिक्ताद्धादशीचेद्यस्तांनोपोषयेद्यदि ॥ द्धा
दशद्धादशीर्हंतिद्धादशीचातिलंघिता ॥१६६॥ द्धादश्यामतिरिक्तायांयोभुंक्तेपूर्ववासरे ॥ द्धादशद्धादशीर्हं
तिद्धादशींनपरित्यजेत् ॥१६७॥ द्धादशींश्रवणोपेतांयोनोपोष्यात्सुमंदधीः ॥ पंचसंवत्सरकृतंपुण्यंतस्य
विनश्यति ॥ १६८ ॥ एकादशीमुपोष्याथद्धादशीमप्युपोषयेत् ॥ नतत्रविधिलोपःस्यादुभयोर्देवताहरिः
॥१६९॥ अल्पायामपिविप्रेंद्रपारणंतुकथंभवेत् ॥ पारयित्वोदकेनापिभुंजानोनैवदुष्यति ॥ अशितानशि
तायस्मादापोविद्धद्भिरीरिताः ॥१७०॥ अंभसाकेवलेनैवकरिष्येव्रतपारणं ॥ तद्धिशिष्टंमुनिप्रोक्तमशिता
नशितंचयत्॥१७१॥नकाशीनगयागंगानरेवानचपुष्करं ॥ नचापिकौरवंक्षेत्रंतुल्यंभूपहरेर्दिनात् ॥१७२॥
अश्वमेधसहस्राणिवाजपेयशतानिच ॥ एकादश्युपवासस्यकलांनार्हंतिषोडशीं ॥१७३॥ एकादशीसमुत्थे ॥७६४॥
नवह्निनापातकेंधनं ॥ भस्मीभवतिराजेंद्रअपिजन्मशतोद्भवं ॥१७४॥ नेदृशंपावनंकिंचिन्नराणांभुविवि

द्यते ॥ यादृशंपद्मनाभस्यदिनंपातकहानिदं ॥१७५॥ तावत्पापानिदेहेस्मिंस्तिष्ठंतिमनुजाधिप ॥ याव
न्नोपोषयेज्जंतुःपद्मनाभदिनंशुभं ॥१७६॥ एकादशेंद्रियैःपापंयत्कृतंभवतिप्रभो ॥ एकादश्युपवासेनतत्सर्वं
विलयंव्रजेत् ॥१७७॥ एकादशीसमंकिंचित्पवित्रंनहिविद्यते ॥ व्याजेनापिकृताराजन्नदर्शयतिभास्करिं
॥१७८॥ श्रीव्यासः॥अन्नंनिवेदयेन्मह्यंप्राप्तेमद्वासरेशुभे ॥ तस्यापिनरकप्राप्तिःकिंपुनर्भोजनेकृते ॥१७९॥
सब्रह्महासगोघ्नश्चसस्तेनोगुरुतल्पगः ॥ एकादश्यांतुभुंजानःपक्षयोरुभयोरपि ॥१८०॥ वरंस्वमातृगमनं
वरंगोमांसभक्षणं ॥ वरंहत्यासुरापानमेकादश्यन्नभक्षणात् ॥१८१॥ एकादशीदिनेपुण्येभुंजतेयेनराधमाः॥
अवलोक्यमुखंतेषामादित्यमवलोकयेत् ॥१८२॥ पृथिव्यांयानिपापानिब्रह्महत्यादिकानिच ॥ अन्नमाश्रि
त्यतिष्ठंतिसंप्राप्तेहरिवासरे ॥१८३॥ रुक्मांगदः ॥ अष्टवर्षाधिकोयस्तुह्यशीतिर्नहिपूर्यते ॥ योभुंक्तेमानवः
पापोविष्णोरहनिचागते ॥१८४॥ पितावायदिवापुत्रोभार्यावापिसुहृज्जनः ॥ पद्मनाभदिनेभुंक्तेनिग्राह्यो
दस्युवद्भवेत् ॥१८५॥ ब्रह्मा ॥ उपोष्यद्वादशींपुण्यांसर्वपापक्षयप्रदां ॥ नपश्यंतियमंवापिनरकाणिनया
तनां ॥१८६॥ शंकरः॥रटंतीहपुराणानिभूयोभूयोवरानने॥नभोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे ॥१८७॥

कृष्णा० द्वादशीनप्रमोक्तव्यायावदायुःप्रवर्तते ॥ अर्चनीयोहृषीकेशोविशुद्धेनांतरात्मना ॥१८८॥ भक्त्याग्राह्योहृ महा०
॥ ८ ॥ षीकेशोनधनैर्धरणीसुराः ॥ भक्त्यासंपूजितोविष्णुःफलंधत्तेसमीहितं ॥१८९॥ जलेनापिजगन्नाथःपूजि
तःक्लेशनाशनः॥ परितोषंप्रयात्याशुतृषार्तस्तुयथाजलैः ॥१९०॥ आसीनस्यशयानस्यतिष्ठतोव्रजतोपिवा ॥
रमस्वपुंडरीकाक्षनृसिंहहृदयेमम ॥१९१॥ करावलंबनंदेहिश्रीकृष्णकमलेक्षण ॥ भवपंकार्णवेघोरेमज्जतो
ममसर्वदा ॥१९२॥ सर्वगश्चैवसर्वात्मासर्वावस्थासुचाच्युत ॥ रमस्वपुंडरीकाक्षनृसिंहहृदयेमम ॥१९३॥
( एकादश्यांनभुंजीतनसुरांवापिबेत्कचित् ॥ ब्राह्मणोनैवहंतव्यइत्येषावैदिकीस्मृतिः) ॥१९४॥ त्राहित्रा
हिजगन्नाथवासुदेवाच्युताव्यय ॥ मांसमुद्धरगोविंददुःखसंसारसागरात् ॥१९५॥ एतत्पुण्यमिदंगुह्यंपवि
त्रंपापनाशनं ॥ आयुष्यंचयशस्यंचधन्यंदुःस्वप्ननाशनं ॥१९६॥ कलौपापंकियन्मात्रंहत्यास्तेयादिसंभवं ॥
स्मृतेमनसिगोविंदेदह्यतेतूलराशिवत् ॥१९७॥ कलौकेशवभक्तानांनभयंविद्यतेक्कचित् ॥ स्मृतेसंकीर्तिते
ध्यातेसंक्षयंयातिपातकं ॥१९८॥ अध्येतव्यमिदंशास्त्रंश्रोतव्यमनसूयया ॥ भक्तेभ्यश्चप्रदातव्यंधार्मिकेभ्यः ॥७६५॥
पुनःपुनः॥१९९॥ अधीयानाइदंशास्त्रंविष्णोर्माहात्म्यमुत्तमं ॥ सर्वपापविनिर्मुक्ताःप्राप्नुवंतिपरंपदं ॥२००॥